M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Sur. 940

Title: Sthalipakavidhi

740

स्थालीपाक विधिः

Sthālipāka Vidhi	:	Title
	:	Author
	:	Editor
	:	Year, Vols.
	:	Publisher
740	:	Remarks

॥ रथहली[illegible]कप्रारंभः ॥ श्री ॥ ॥

॥१॥ श्रीगणेशाय नमः॥ अथ स्थालीपाकः॥ पुरा इंद्रेण वज्रेण हत्वा महासुरे। व्यापितो मेदसा पृथ्वी
तदर्थं स्थंडिलं कुरु॥ तत्रादौ स्थंडिलकरणं। तच्च गोमयोपलिप्ते शुचौ देशे भूद्धयाम दाईशान्यां भमुख्यत्वे
स्थं चतुरंगुलोन्नतमंगुलोन्नतं वा चतुर्दिक्षु मीलितादिक्षु सप्तयंगुलपरिधिकं फलितमष्टादशांगुलवि
स्तृतं होमानुसारेण तदधिकं वा न तु ततो न्यूनं मध्योन्नतं स्थंडिलं कुर्यात्। तच्छामयेन प्रदक्षिणमुपलिप्य
दक्षिणे द्वे ८ उदीच्यां द्वे २ प्रतीच्यां चतुः ४ प्राच्यामद्वे मित्यंगुलानि त्यक्त्वा दक्षिणोपक्रमामुदक्संस्थां प्रा
देशमात्रमेकां लेखां तस्या दक्षिणोत्तरयोः प्रागायते पूर्वरेखया असंसृष्टे प्रादेशसंमिते द्वे लेखे लिखि
त्वा तयोर्मध्ये परस्परमसंसृष्टा उदक्संस्थाः प्रागायतास्तिस्र इति षड्रेखा यतियज्ञकमूलेन दक्षिण
हस्तेनोल्लिख्य तच्छकलमुदगग्रे निधाय स्थंडिलमद्भिरभ्युक्ष्य शकलमाग्नेय्यां निरस्य पाणिं प्रक्षाल्य
वाग्यतो भवेत्। ततस्तैजसेन मृन्मयेन वा पात्रयुग्मेन संपुटीकृत्य सुवासिन्या निर्धूममग्निमाहृ
तं स्थंडिलादाग्नेय्यां निधाय जुष्टो दमूना इत्यत्र यावसुश्रुतोग्निस्त्रिष्टुप्। एवाग्नेराहुगणो गोतमोग्निस्त्रि
ष्टुप्। अग्न्यावाहने विनियोगः। ॐ जुष्टो दमूना अतिथिः० एवाग्ने राहुगोता० इत्यस्य तैस्त्वावाह्य आच्छादनं
दूरीकृत्य समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती। अग्निप्रतिष्ठापने विनियोगः। ॐ भूर्भु
वः स्वरित्यग्निमाभिमुखं अमुकनामाग्निं प्रतिष्ठापयामीति प्रतिष्ठाप्य प्रोक्षितेंधनानि निक्षिप्य वेणुधम ॥१॥

न्या प्रबोध्य ध्यायेद्देवं॥ चत्वारि शृंगा गोतमो वामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्याने विनियोगः। ॐ चत्वारि
शृंगा त्रयो अस्य० मर्त्यां आविवेश। स्मृतिमंत्राश्च। सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः। त्रिपात्प्रसन्न
वदनः सुखासीनः शुचिस्मितः। स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा। बिभ्रद्दक्षिणहस्तैस्तु शा
मन्नं स्रुचं स्रुवं। तोमरं व्यजनं वामैर्घृतपात्रं च धारयन्। आत्माभिमुखमासीन एवंरूपो हुताश
सविदृष्टमारायx५ नः। इति ध्यात्वा ॐ वन्य प्राणानायम्य देशकालौ स्मृत्वा ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं
दर्शपौर्णमासाख्यस्थालीपाकान्योयक्ष्ये तत्रेदानीं पौर्णमासस्थालीपाकेन यक्ष्ये दर्शे तु दर्शस्थालीपाके
न यक्ष्ये इति विशेषः। तत्र देवतापरिग्रहार्थमन्वाधानं करिष्ये इति संकल्प्य। अस्मिन्नन्वाहिते
ग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते आज्येन अग्नीषोमौ चक्षुषी आज्येन
अग्निमग्नीषोमौ च प्रधानदेवते चरुद्रव्येण दर्शे तु अग्निमिंद्राग्नी च प्रधानदेवते चरुद्रव्येणे
ति विशेषः। शेषेण स्विष्टकृतमग्निमिध्मसन्नहनेन रुद्रं अयासमग्निं देवान् विश्वान् अग्निं वायुं सू
र्यं प्रजापतिं चैताः प्रायश्चित्तदेवता आज्येन ज्ञाताज्ञातदोषनिबर्हणार्थं त्रिवारं सवितारं मरुतश्च आज्ये
न विश्वान्देवान् संस्रावेण अंगदेवताः प्रधानदेवताः सर्वाः संनिहिताः संतु एवं सांगेन कर्मणा सद्यो
यक्ष्ये इति संकल्प्य। तूष्णीं समस्तव्याहृतिभिर्वा समिद्धोमं कुर्यात्। व्याहृतिपक्षे व्याहृतीनामित्यादि प्र

स्था० श्रा

॥२॥ वं वस्तु ॥ अन्वाधाने समिद्धोमे विनियोगः। ॐ भूर्भुवःस्वाहा प्रजापतय इदं न मम इति त्यागः। तं चाग्निं
धारयेत्॥ ततस्त्रिभिस्त्रिभिः कुशदलैः सव्यं पाणिमभ्यो दक्षिणं चोपरि कुर्वन् पूर्वं दलाग्रैरूनं रज्जु
मूलैश्च त्रिसंधिं द्विगुणां रज्जुं कृत्वा पुनर्दक्षिणमधः सव्यं चोपरि कुर्वन्नेवं त्रिगुणयेत्।
अंते प्रदक्षिणं ग्रंथिं दद्यात्। एवं षट्त्रिंशद्दर्भदलैरेका रज्जुर्भवति। तेन स्वायुरज्ज्वा
यां प्रादेशमात्रां मुष्टिपरिमितां दर्भान्निधाय तया बर्हिर्द्विरावेष्ट्य रज्ज्वग्रेण रज्जुमूलं स
कृदावेष्ट्य तदग्रं शेषं पूर्ववेष्टितरज्ज्वा अधस्तान्निनीय परिस्तरणार्थं दर्भैः सहाग्न्याय
तनात्पश्चादग्नेरुपरि निदध्यात्॥ ततोऽन्ययाऽदृश्यैव कृतया रज्ज्वा उदगग्रया पालाशखदि
रसंभवे शम्यौदुंबरादियज्ञियवृक्षमयमरत्निमात्रं वितस्तिमात्रं वा पंचदशदारुकमिध्मं
प्रागग्रं सकृदावेष्ट्य पूर्ववन्निदध्यात्। अत्रेध्माबर्हिषोर्बंधने केचिन्मंत्रानिच्छंति। तत्र बर्हि
षि बंधनमंत्राः। पूषा ते ग्रंथिं बध्नातु। स ते मा स्थात्। इति। इध्मबंधनमंत्राः। यत्ते कृष्णोरूपं कृ
त्वा प्राविशस्त्वं वनस्पतीन्। अतस्त्वां पंचदशधा संभरामि सुसंभृता। इति एकविंशाधेस्य
पंचदशाधेन्यूहनमन्ये त्वनूहमाहुः। अपरे तु मंत्रान्नेच्छंति। ततः पत्नी अग्न्यायतनादु ॥२॥

करणं कुर्यात्। ततो दंपती गंधादिभिः स्वशरीरेऽलंकृत्य तद्दिने कलहक्रयविक्रयप्रहासानृतबहुभा य
षणवीर्यादिव्यसनपर्यंकशयनदंतधावनकरणं कुक्षिष्ठकोद्रवचणकमसूरवृन्ताकक्षारलव
णकोरदूषकमधुमाषमांसमद्यपरान्नोपवासतैलमैथुनानि वर्जयेतां॥ दधिघृतपयोमिश्र
हविष्यान्नं दिवैव सकृद्भुंजीयातां। आढकी तु आढकीशेषं माषाद्यन्नं भुंजीत। व्रतलोपे प्रायः स
हस्रवेशनेन वा उपोष्य त्वमग्ने व्रतपा इत्यनयाज्याहुतिं जुहुयात्। त्वमग्ने व्रतपा इत्यस्य वत्सा
गिर्गायत्री। व्रतलोपजनितप्रत्यवायपरिहारार्थमाज्याहुतिहोमे विनियोगः। त्वमग्ने
व्रतपा असि इति स्वक्। व्रतपाग्नय इदं। यद्वाऽनिर्वापादिपूर्वकं व्रतपायाग्नये पार्वणस्थाली
चरुं पाकसमानतंत्रं प्रधानाहुतिं जुहुयात्। ततः प्रतिपदि प्रातरौपासनं हुत्वाऽग्निं परिसमुह्य
परिस्तृणीयात्। तत्रेदं। अग्न्यायतनाद् द्व्यंगुलिपरिमितदेशे ऐशानीं दिशमारभ्य प्र
दक्षिणं समंतात्सोदकेन पाणिना त्रिः परिमृज्य पूर्वमुपरिनिहितदर्भैर्द्व्यंगुलिमिते देशे
पा प्राच्यादिषु परिस्तृणीत। तत्र प्राच्यां प्रतीच्यां चोदगग्रा दर्भाः अवाच्यामुदीच्यां च प्रागग्राः
पूर्वपश्चात्परिस्तरणमूलयोरुपरि दक्षिणपरिस्तरणोत्तरस्तरणं तु तदग्रयोरधस्तात्॥ रपरि
ते च दर्भा अनियतसंख्याः एकैकस्यां दिशि चत्वारस्त्वेवं षोडश वा। ततोऽग्नेर्दक्षिणतो ब्रह्मा

सनार्थमुत्तरतश्च पात्रासादनार्थं कांश्चिद्दर्भान्प्रागग्रांस्तृणीयात् । अग्नेरीशानतश्चरं
भस्मापरिषिच्य । ततः उत्तरतः स्तीर्णेषु दर्भेषु दक्षिणसव्यपाणिभ्यां क्रमेण दक्षिणसव्यपाणि
भ्यां क्रमेण चरुस्थालीप्रोक्षण्यौ द्वौ स्रुवौ प्रणीतापात्रं इध्माबर्हिषी शूर्पं कृ
ष्णाजिनउलूखलमुसले चेति द्वंद्वं उदगपवर्गं प्राक्संस्थं वा न्युब्जान्यासादयेत् [illegible]
आज्यमात्रहोमे तु प्रोक्षणीस्रुवौ प्रणीतापात्रं इध्माबर्हिषी चेत्येतावतामेवासादनं
ततः प्रोक्षणीपात्रमुत्तानीकृत्वा तत्रानंतर्गर्भितसाग्रसमस्थूलप्रादेशमात्रे कुशद्वयरू
पे पवित्रे निधाय शुद्धाभिरद्भिरापात्रं पूरयित्वा गंधपुष्पादि क्षिप्त्वा हस्तयोरंगुष्ठोपकनि
ष्ठिकाभ्यां उदगग्रे पृथक्पवित्रे धृत्वा अपस्त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इध्मं च
विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षेत् । आपः किंचित्कमंडलौ निक्षिप्य द्वितीयवेनोतोय
थोक्तलक्षणमीदृशानीदृशावर्जितं ब्राह्मणं अस्मिन्कर्मणि ब्रह्माणं त्वामहं वृण इति तस्या
णिपाणिना गृहीत्वा वृणुयात् ॥ ततो ब्रह्मा वृतोस्मीत्युक्त्वा प्राङ्मुखो यज्ञोपवीत्याचम्य
सममलपाणं प्रगृह्योद्धृत्वा अग्रेणाग्निं परीत्य ततः दक्षिणत उदङ्मुखस्थित्वा आसनार्थदर्भे
षु दक्षिणभागस्थमेकं दर्भमंगुष्ठानामिकाभ्यां गृहीत्वा निरस्तः परावसुरिति नैर्ऋत्यां नि
रस्यापस्पृश्य इदमहमर्वावसोः सदने सीदामीत्युक्त्वोदङ्मुख एव वामोपरि दक्षिणपा

दं संस्थाप्योपविश्य यागं ध्यायस्तादिभिरचिंतितः सन् ॐ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृ
हस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि इति जपित्वा यज्ञमना एव वर्तेत ततो
यजमानः प्रणीतापात्रमग्नेः प्रत्यक्कुनिधाय तत्र पवित्रे निधायापूताभिरद्भिः पूरयित्वा गंधपु
ष्पाक्षतान्निक्षिप्य नासिकाग्रे धारयन्नग्नेरुत्तरतो दर्भेषु निधाय तत्पवित्रे गृहीत्वा अ
न्यैर्दर्भैराच्छादयेत् ततः प्रत्यग्मुखः कुशेषु शूर्पं निधाय तत्र प्रागग्रपवित्रे निधायाग्नये त्वा
जुष्टं निर्वपामीति मंत्रावृत्त्या व्रीहीणां यवानां वा चतुरो मुष्टीन्निरूप्य अग्नीषोमाभ्यां त्वा
जुष्टं निर्वपामीति तथैव निरूप्य तत्पवित्रे व्रीहीणामुपरि निधाय ताभिरद्भिरग्नये त्वा
जुष्टं प्रोक्षामीति निर्वापवत्स्वयो प्रोक्षेत् एवमग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामीति तथैव प्रो
क्षेत् ॥ दर्शे तु अग्नीषोमपदस्थाने इंद्राग्निभ्यां त्वेत्यादि निर्वापप्रोक्षणे च विशेषः ॥ एवंन्य
ममंत्रक होमे निर्वापप्रोक्षणे च यथाप्रधानदेवतं देवतानामग्रहणेन कार्यं ॥ समंत्रकहोम
तु श्रवणाकर्मादौ व्रीही चतुरश्चतुरो मुष्टीन्निर्वपेत् प्रोक्षेच्च ॥ ततः पात्राणामुत्तरतः प्राग्ग्रीव
मास्तीर्णे ऊर्ध्वलोम्नि कृष्णाजिने निहिते उलूखले मुसलेन पत्न्यवहत्य त्रिः शुक्लीकुर्यात् ॥
तांस्त्रिः प्रक्षाल्य तान्पृथक्पात्रे एकपात्रे वा अविदग्धमनवस्रावितमंतरूष्मपक्वं स्यु

श्रा०प्र०

॥५॥ कृतं वर्हः पर्येत् । ततः पवित्रे आज्यपात्रे निधाय तस्मात्तेषूत्तरतः संस्थाप्य तस्मिन्नाज्यमासि
च्याग्नेरुत्तरतः स्थितांगारान्भस्मना सहाग्नेरुत्तरतो निरूह्य तेषु आज्यपात्र
मधिश्रित्य ज्वलता तेनैव दर्भोल्मुकेनावज्वाल्य तत्पवित्रमाज्ये प्रक्षालितं दर्भाग्रद्वयमा
ज्ये प्रक्षिप्य पुनर्ज्वलता तेनैव दर्भोल्मुकेन चरुणा सहाज्यं त्रिः पर्यग्निकृत्वा तदुल्मुकं
निरस्याप स्पृष्ट्वाज्यपात्रमुदक्कर्षेत् निवादग्नुदस्यांगारानग्नौ प्रत्यस्याप स्पृष्ट्वा तत्रस्थ
मेवाज्यं सवितुष्ट्वा हिरण्यस्तूप सविता पुरउष्णिक् आज्योत्पवने विनियोगः । ॐ स
वितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति मंत्रेणैकं भु
यो वारत्रिं तूष्णीं उत्पवनं विधाय पवित्रे निक्षिप्य उद्गतत्रो
भ्यां पृथक्पवित्राभ्यामाग्रतः प्रत्यग्जलेन पवित्रे द्विः प्रोक्ष्याग्नौ प्रहरेत् । हंसी स्रुवेदायस्यात्तेन मं
त्रेणेति केचित् । अथाग्नेः पश्चात्परिस्तरणाद्बहिरासनोग्रतो भुवं प्रोक्ष्य तत्र बर्हिः स्त ॥५॥
नहनीं रज्जुमुदगग्रां प्रसार्य तस्यां बर्हिः प्रागग्रमुदगग्रमुदगपवर्गमविरल
मास्तीर्य तस्मिन्नाज्यपात्रं निधाय स्रुवादिसंमार्जयेत् ॥ तद्यथा दक्षिणेन हस्तेन स्रुक्स्रुवौ

गृहीत्वा सव्येन कांश्चिद्दर्भानादाय तानग्नौ प्रताप्य स्रुचं निधाय दक्षिणेन हस्तेन
स्रुवं गृहीत्वा विकीर्णदर्भाग्रैः प्रागादि प्रागपवर्गं त्रिः संमृज्याधस्तादूर्ध्वाग्रेणैवाभ्यासेन बिलपृष्ठं
त्रिः संमृज्य ततो दर्भाणां मूलैर्दंडस्याधस्ताद्बिलपृष्ठादारभ्य यावद्दंडपरिसमाप्ति बिलं
तावत्त्रिः संमृज्याद्भिः प्रोक्ष्य स्रुवं निष्टप्याज्यस्थाल्या उत्तरतः स्रुग्दक्षिणं निधायोद
कं स्पृष्ट्वा तैरेव दर्भैर्जुहूं रेवमेव संमृज्य स्रुवाद्युत्तरतो निधाय दर्भानद्भिः क्षालयित्वा
ग्नावनुप्रहरेत् । ततः शुक्लं तं चरुं स्रुवगृहीतेनाज्येनाभिघार्योदगुद्वास्याग्नेराज्ये
पश्चिमेनोत्तरेण नीत्वाज्याद्दक्षिणतो बर्हिषि सांतरमासाद्य पुनरप्यभिघार्य न वा
भिघार्य हविः पृथक्करणात्पात्रांतरं चर्वाज्ययोर्मध्ये निधायैकांगुलिमित
दर्भेणाक्षतपुष्पैरर्चनं समर्चयेत् । विश्वानि न इत्यस्य वसुश्रुत आत्रेयः त्रिष्टुप् अग्नि स
र्चने विनियोगः । विश्वानि न इति द्वे स्रुचे समर्चयित्वा । ॐ विश्वानि नो दुर्गहा जातवेदः
अमन्तव्यमस्थं ॥३॥ ततः आत्मानं चालंकृत्य हस्तं प्रक्षाल्य इध्मबंधनरज्जुमि
ध्मस्थाने निधाय पाणिनेध्ममादाय मूलमध्याग्रेषु स्रुवेणात्रिरभिघार्य मूल

स्था॰ प्र॰
५

मध्यपोर्मध्यभागे गृहीत्वा । अयंतेवामदेवो जातवेदा अग्निस्त्रिष्टुप् । इध्महवने विनियोगः
ॐ अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय चास्मान् प्रजया पशुभिर्ब्र
ह्मवर्चसेनान्नाद्येन समेधय स्वाहा । जातवेदसे अग्नय इदं न मम इति त्यजेत् ॥ ततः स्रुवेणा
ज्यमादाय प्रागायतनस्य वायव्यकोणमारभ्याग्निपकोणपर्यंतं प्रजापतय इति मनसा
स्मरन्स्वाहेत्युच्चार्य नैरंतर्येणाज्यधारामग्नौ निधाय दारूपरि हुत्वा पुनस्स्रुवमादाय
नेन नैर्ऋत्यकोणतः ईशानीपर्यंतं तथैव हुत्वा त्यक्त्वा च स्रुवेणाज्यमादायाग्नेरु
स्वाहेत्यग्नये स्वाहेत्युत्तरपार्श्वपूर्वभागे हुत्वा पुनराज्यमादाय सोमाय स्वाहेति अग्नि
दक्षिणपार्श्वे तत्समप्रदेशे हुत्वा । पूर्वनिहितपात्रे चरुमुद्धृत्य पृथक्कृत्य इदमग्नय इ
दमग्नीषोमाभ्यामिति चरुभागद्वयं कृत्वा तस्य मध्यमभिमृश्यावदानधर्मेण जुहुया
त् ॥ एवं नाममंत्रकहोमे यथादेवतं विभक्तस्य चरोरभिमर्शः समंत्रकहोमे तु नाभिम
र्शो नाभिमर्शश्च । अथावदानधर्मः । स्रुवेण स्रुच्याज्यमुपस्तीर्य प्रथमप्रधानदे
वताचरुभागमध्यादंगुष्ठपर्वमात्रं तिरश्चीनाभिरंगुलीभिरंगुष्ठमध्यमानामि नैवसंस्पर्श मकुर्वन ×

काभिरंगुलीभिर्नखसंस्पर्शमकुर्वन्नवदाय दर्व्यामोप्य पात्रस्थे ततश्चरोः पूर्वभागं
प्रागग्राभिस्तथैवावदाय दर्व्यामोप्य पात्रस्थं हविरभिघार्य दर्वीस्थमवत्तं चाभिघार्य वि
धूमाग्निज्वालायामग्नये स्वाहेति स्वाहेत्याज्यभागयोर्मध्यप्रदेशे तत्समदेशे वा आज्या
हुत्यनिवदर्व्या पूर्वभागे हुत्वा अग्नय इदं न ममेति त्यक्त्वा पुनः पूर्ववदुत्तरहविर्भा
गादवदाय ॐ अग्नीषोमाभ्यां स्वाहेति पूर्वाहुतेः प्राग्भागे हुत्वा अग्नीषोमाभ्यामिदं न म
मेति त्यागः । पंचावत्ती तु दर्व्यामुपस्तीर्य मध्यात् पूर्वार्द्धात् पश्चार्द्धाच्च त्रिर्हविषो वदायाभि
घार्य जुहुयात् । पंचावत्तिनस्तु जामदग्न्या वत्सा विदा वा ऋषिणा तथैव च ॥ भार्गवच्या
वनाप्नवौर्व्याः पंचावत्तिनः स्मृताः । इतरेतु अग्नीषोमपदस्थाने इंद्राग्निभ्यामिति विशे
षः ॥ अथ स्विष्टकृद्धोमः । तत्र दर्व्यामुपस्तीर्य प्रथमहविर्भागस्योत्तरार्द्धतः पूर्वा
वदानतो न्यूनं चीनाभिरेवांगुलीभिरवदाय दर्व्यामोप्य द्वितीयहविर्भागस्य
तथैवावदाय पंचावत्ती तु हविर्भागद्वयेप्युत्तरार्द्धात् पूर्वार्द्धाद् द्विरवदाय पा
त्रस्थमनभिघार्य अवत्तं तु द्विरभिघार्य यदस्येति हिरण्यगर्भो अग्निर्धृतिः
स्विष्टकृद्धोमे विनियोगः । ॐ यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरं ॥

ता· प्र
रावसांब·
ग्रा·प्र·१
६

अग्निष्टस्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे ॥ अग्नये स्विष्टकृते सुहुतहुते सर्व
प्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्समर्द्धय स्वाहा । इत्येक
ष्कृतो आर्याम्नावीक्ष्मान देशेज्जु स्याह । स्विष्टकृते न यद इदं न मम इति त्यागः॥ ने
नोग्नेकृन रत्नस्थिनाभिध्यबंधनरज्जुं विस्रस्य रूप पस्वाहा नि हुत्वा· रुद्राय द·
नसं नोगेनकृ नरगस्थिना मिध्यबंधनरज्जुं विस्रस्य रूपायस्व

वः या

हरंब·
६